द्रावकरं, क्ली, (द्रावं सुवर्णादेर्द्रवं करोति स्वसंयोगेनेति। द्राव+कृ+टः।) श्वेतटङ्कणम्। इति राजनिर्घण्टः॥

द्रावणं, क्ली, (द्रावयति जलमलं स्वसम्पर्केणेति। द्रु+णिच्+युच्।) कतकफलम्। इति रत्नमाला॥ निर्म्मली इति भाषा॥ (द्रावि+ल्युट्।) विद्रावणञ्च॥ (द्रावयतीति। द्रावि+ल्युः। पलायनकारयितरि, त्रि। यथा, महाभारते। ८।३४।६८।

"स देवयुक्तो रथसत्तमो नो
दुराधरो द्रावणः शात्रवाणाम्॥")

द्राविका, स्त्री, (द्रावक+टाप्। अत इत्वञ्च।) लाला। इति शब्दरत्नावली॥

द्राविडः, त्रि, (द्राविडो देशोऽभिजनोऽस्येति। अण्।) देशविशेषजातः। (यथा, महाभारते। ८।१२।१४।

"सात्यकिश्चेकितानश्च द्राविडैः सैनिकैः सह॥")

पञ्चद्राविडाः। यथा, द्रविडः १ कर्णाटः २ गुर्ज्जराटः ३ महाराष्ट्रः ४ तैलङ्गः ५। यथा, स्कन्दपुराणे।

"कार्णाटाश्चैव तैलङ्गा गुर्ज्जरा राष्ट्रवासिनः।
आन्ध्राश्च द्राविडाः पञ्च विन्ध्यदक्षिणवासिनः॥"

संख्याभेदः। वैधसुखा। इति मेदिनी। डे, ३०॥ कर्च्चूरः। इति राजनिर्घण्टः॥

द्राविडकं, क्ली, (द्रविडे देशे भवः। अण् ततः संज्ञायां कन्।) विड्लवणम्। इति राजनिर्घण्टः॥

द्राविडकः, पुं, (द्राविड एव। स्वार्थे कन्।) वैधसुखकः। इत्यमरः। २।४।१३५। जिँयल वली इति भाषा॥

द्राविडभूतिकः, पुं, (द्राविड एव भूतिरुत्पत्तिस्थानं यस्य। कप्।) द्राविडकः। इति शब्दरत्नावली॥

द्राविडी, स्त्री, (द्रविडे भवा। द्रविड+अण्। ङीप्।) एला। इति राजनिर्घण्टः॥ (इयं एला तु गुजराती इति ख्याता॥ अस्याः पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।

"सूक्ष्मोपकुञ्चिका तुत्था कोरङ्गी द्राविडी त्रुटिः॥")

द्राव्यं, त्रि, (द्रु+ण्यत्।) अवश्यगमनीयम्। अवश्यक्षरणीयम्। अवश्यानुतपनीयम्। इति द्रुधातोरवश्यम्भावार्थे ण्यत्प्रत्ययः॥

द्राह, ऋ ङ जागरे। निक्षेपे। इति कविकल्पद्रुमः॥ (भ्वा-आत्म-अकं-सेट्।) ऋ, अदद्राहत्। ङ, द्राहते। इति दुर्गादासः॥

द्रु, स्रुतौ। गतौ। इति कविकल्पद्रुमः॥ (भ्वा-परं-सकं-अनिट्।) द्रवति। इति दुर्गादासः॥

द्रु, र न उपतापे। इति कविकल्पद्रुमः॥ (स्वा-परं-अकं सकं च-अनिट्।) र, वैदिकः। न, द्रुणोति। उपताप इह उपतप्तीभावः उपतप्तीकरणञ्च। इति दुर्गादासः॥

द्रुः, पुं, (द्रवति ऊर्द्ध्वं गच्छतीति। द्रु+मितद्र्वादित्वात् डुः।) वृक्षः। इत्यमरः। २।४।५॥ (यथा, मनुः। ७।१३१।

"आददीताथ षड्भागं द्रुमांसमधुसर्पिषाम्॥")

गतौ, स्त्री। इति शब्दरत्नावली॥

द्रुकिलिमं, क्ली, (किल्यतेऽनेनेति। किल श्वैत्यक्रीडनयोः+बाहुलकात् किमच्। द्रुषु वृक्षेषु किलिमम्।) देवदारुवृक्षः। इत्यमरः। २।४।५३॥ (अस्य पर्य्यायो यथा वैद्यकरत्नमालायाम्।

"देवदारुद्रुकिलिमं सुराह्वं भद्रदारु च।
देवकाष्ठं पीतदारु देवदारु च दारु च॥")

द्रुघणः, पुं, (द्रुर्वृक्षः हन्यतेऽनेनेति। हन+"करणेऽयोविद्रुषु।" ३।३।८२। इति अप् घनादेशश्च। "पूर्व्वपदात् संज्ञायामगः।" ८।४।३। इति णत्वम्। द्रुममयो घनः इति वा।) मुद्गरः। इत्यमरः। २।८।९१॥ सूत्रधारादिशस्त्रकारलौहमयास्त्रभेदः। इति भरतः॥ (वैशम्पायनोक्तधनुर्व्वेदमतेऽयं परशुवल्लौहास्त्रम्। यदुक्तम्।

"द्रुघणस्त्वायसाङ्गः स्यात् वक्रग्रीवो दृढच्छिराः।
पञ्चाशदङ्गुलीतुल्यो मुष्टिसम्मितमण्डलः॥"

अस्य चतस्रः क्रियाः। यथा,—

"उन्नमनं प्रपातश्च स्फोटनं दारणं तथा।
चत्वार्य्येतानि द्रुघणे वल्गितानि श्रितानि वै॥"

द्रुः संसारवृक्षो हन्यतेऽनेनेति।) ब्रह्मा। कुठारः। इति मेदिनी। णे, ५३॥ भूमिचम्पकः। इति शब्दचन्द्रिका। इत्यन्नाम्नोऽपि॥

द्रुड, मज्जने। इति कविकल्पद्रुमः॥ (तुदां-परं-अकं-सेट्।) रेफयुक्तः। मज्जनमिति मस्जधातोरूपम्। द्रोडति प्रस्तरो जले। दुद्रोडिषति। इति दुर्गादासः॥

द्रुड, शि मज्जने। इति कविकल्पद्रुमः॥ (तुदां-परं-अकं-सेट्।) शि, द्रुडति अद्रुडीत् दुद्रोड। एषः कैश्चिन्न मन्यते। क्रमदीश्वरस्तु कुटादिमेव मन्यते। इति दुर्गादासः॥

द्रुण, श जैह्म्ये। गतौ। वधे। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) दन्त्यवर्गतृतीयादिः। श, द्रुणति दुद्रोणिषति। जैह्म्यं कुटिलीकरणम्। इति दुर्गादासः॥

द्रुणं, क्ली, (द्रुणति छिनत्तीति। द्रुण+"इगुपधेति।" ३।१।१३५। इति कः।) धनुः। खड्गः। इति हेमचन्द्रः। ४।२७७॥

द्रुणः, पुं, (द्रुणति छिनत्तीति। द्रुण+कः।) वृश्चिकः। भृङ्गः। इति हेमचन्द्रः। ४।२७७॥ त्रि, पिशुनः। इति शब्दमाला॥

द्रुणसः, त्रि, (द्रुरिव दीर्घा नासिका यस्य। "अङ्गनासिकायाः संज्ञायां नसं चास्थूलात्।" ५।४।११८। इति अच्। नसादेशश्च। "पूर्व्वपदात् संज्ञायामगः।" ८।४।३। इति णत्वम्।) दीर्घनासिकायुक्तः। इति संक्षिप्तसारव्याकरणम्॥

द्रुणह्नः, पुं, (द्रुणं खड्गं हन्ति गच्छतीति। हन् गतौ+डः।) खड्गपिधानम्। इति हारावली। १२५॥

द्रुणा, स्त्री, (द्रुणं धनुराश्रयत्वेनास्त्यस्याः। अच्। टाप्।) ज्या। इति हेमचन्द्रः। ३।४३६॥

द्रुणिः, स्त्री, (द्रुणति जलादिकमिति। द्रुण गतौ+"इगुपधात् कित्।" उणां। ४।११८। इति इन्।) द्रोणी। इत्यमरटीकायां भरतः॥

द्रुणी, स्त्री, (द्रुण+इन्। वा ङीप्।) कर्ण-जलौका। कच्छपी। इति लिङ्गादिसंग्रहे अमरभरतौ॥ काष्ठाम्बुवाहिनी। इति द्रोणीशब्दटीकायां भरतः॥

द्रुतं, त्रि, (द्रवति स्मेति। द्रु+गत्यर्थेति कर्त्तरि क्तः।) जातद्रवीभावघृतसुवर्णादि। तत्पर्य्यायः। अवदीर्णम् २ विलीनम् ३ विद्रुतम् ४। इत्यमरः। ३।१।१००॥ शीघ्रम्। (यथा, महाभारते। १३।२६।८१।

"वायूरिताभिः सुमनोहराभि-
र्द्रुताभिरत्यर्थसमुत्थिताभिः।
गङ्गोर्म्मिभिर्भानुमतीभिरिद्धाः
सहस्ररश्मिप्रतिमा भवन्ति॥")

विद्रावम्। पलायितम्। इति मेदिनी। ते, २५॥ (यथा रघुः। ९।५९।

"जग्राह स द्रुतवराहकुलस्य मार्गं
सुव्यक्तमार्द्रपदपङ्क्तिभिरायताभिः॥")

द्रुतं, क्ली, (द्रु+क्तः।) वृत्यविषयकशीघ्रगमनम्। तत्पर्य्यायः। ओघः २। इत्यमरः। १।२।९८॥ शीघ्रलयः। इति मधुः॥ वृत्यगीतादौ द्रवन्ति गच्छन्ति समुदायगतिप्रदर्शनार्थं करादयोऽत्र। इति भरतः॥ सार्द्धे।

"द्रुतामध्ययने वृत्तिं प्रयोगार्थे तु मध्यमाम्।
शिष्याणामुपदेशार्थे विलम्बितां समाचरेत्॥"

इति वैद्यकवचनम्॥

(क्षिप्रम्। यथा, मनुः। ९।१७२।

"अन्याघातेषु मध्यस्थान् शिष्याच्चौरानिव द्रुतम्॥"

क्रियाविशेषणत्वादस्य क्लीवता॥)

द्रुतः, पुं, (द्रवति स्म ऊर्द्ध्वमिति। द्रु+क्तः।) द्रुमः। इति धरणिः॥

द्रुनखः, पुं, (द्रोर्वृक्षस्य नख इव। असंज्ञात्वात् अत्र णत्वाभावः।) कण्टकम्। इति त्रिकाण्डशेषः॥

द्रुपदः, पुं, पाञ्चालदेशीयचन्द्रवंशीयराजविशेषः। तस्य कन्या द्रौपदी। पुत्रौ शिखण्डिधृष्टद्युम्नौ। इति महाभारतम्॥ (क्ली, यूपैकदेशः। यथा, ऋग्वेदे। १।२४।१३।

"शुनःशेपो ह्यह्वद्गृभीतस्त्रिष्वादित्यं द्रुपदेषु बद्धः।"

"द्रुपदेषु द्रोः काष्ठस्य यूपस्य पदेषु प्रदेशविशेषेषु बद्धः।" इति तद्भाष्ये सायनः॥ काष्ठपादुका। यथा, वाजसनेयसंहितायाम्।२०।२०।

"द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव॥"

"द्रुरुत्सस्तन्मयं पदं द्रुपदं पादुका तस्मान्मुमुचानः पृथग् भवन्।" इति वेददीपः॥)

द्रुपदा, स्त्री, ऋक्। सा च वैदिकमन्त्रविशेषः। यथा, उच्छिष्टस्य चाण्डालादिस्पर्शे आपस्तम्बः।